वर्षम् - ०२ अङ्कः - ०२ शोधज्योतिः
जनवरी-दिसम्बर, २०२० ISSN-2350-0700

# सम्बोधनार्थविचारः

**डॉ. प्रियव्रत मिश्रः**[1]

## वाङ्मुखम् -

[2]प्रातिपदिकस्यैव अर्थः विभक्तिद्योत्यः सम्बोधनार्थः इति नव्यानां सिद्धान्तः। कस्यचित् पूर्वसिद्धस्य उद्देश्यावस्थस्य वस्तुनः पदार्थस्य वा अभिमुखीभाव एव सम्बोधनपदार्थ इत्यभिप्रायः। वक्ता ईदृशेन सम्बोधनार्थेन श्रोतुरभिमुखीभावरूपसाधनेन स्वेष्टां श्रोतृकर्मकां कार्यविशेषविषयिणीं प्रवृत्तिं वा निवृत्तिं वा अभिलषति। अस्यां स्थितौ सम्बोधने चेति सूत्रस्य रचयितुः पाणिनेः मनसि इदं विवक्षितमासीत् यत् यदा वक्ता प्रातिपदिकस्य जात्यादिभिरर्थैः सह एवम्विधं प्रवृत्तिनिवृत्त्यन्तरफलकं श्रोतुरभिमुखीभावं वक्तुमिच्छति तदा सम्बोधनविभक्तिः प्रथमा साध्वी भवति। [3]"सम्बोधने च" इति पाणिनिसूत्रस्य अयमेव अर्थः बोध्य इति [4]नागेशाशयः।

नागेशप्रतिपादितस्यास्य सम्बोधनार्थस्य ग्राह्यतायाः परीक्षणार्थं कतिपयसम्बोधन - विभक्त्यन्तवाक्यानि कतिपयसम्बोधनविभक्तिरहितानि च शिष्टस्वीकृतानि वाक्यानि उपस्थाप्य विमृशामः। अस्मिन् मते सम्बोधनार्थघटकः अभिमुखीभावः स्वीकृतो वर्त्तते। तस्मिन् अभिमुखीभावे परीक्षकत्वेन अस्माभिर्ध्याने दत्ते सति निर्विवादतया इदं सिद्ध्यति यत् यत्र शिष्टजनैः सम्बोधनविभक्तेः प्रयोगः साधुः अभिमतः तत्र वाक्यार्थे प्रथमाख्यसम्बोधनविभक्तिप्रत्ययेभ्यः प्रागेव प्रातिपदिकस्य अर्थः सिद्धावस्थायामेव तिष्ठति।

परन्तु यदि तादृशः प्रातिपदिकार्थः साध्यावस्थापन्नः स्यात् तदा तत्र शिष्टजनैः सम्बोधनविभक्तेः प्रयोगः नैव क्रियते। अथ च तत्र कृतः सम्बोधनविभक्तिप्रयोगः शिष्टैः साधुर्न मन्यते।

अग्रे प्रस्तोष्यमाणैः उदाहरणैः अन्वयव्यतिरेकभावेन परीक्षितैः उद्देश्यभूतस्य सिद्धपदार्थस्य

---

[1] सहायकाचार्यो व्याकरणविभागे, श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम् (आदर्शसंस्कृतमहाविद्यालयः), रमौली, दरभङ्गा-८४७२०१ (बिहारम्)

[2] वै.ल.म- सु.नि

[3] अ. २-३-४७

[4] ल.श.शे.का.प्र.

अभिमुखीभावप्रधान एव सम्बोधानार्थः शिष्टजनानुमोदितः इति सिद्ध्यति। कदाचित् राजपुत्रस्य कुमारावस्थायां नृपत्वसिद्धेः प्राक् तमुद्दिश्य [1]"राजन् युध्यस्व" इति प्रयोगः शिष्टजनानामभिमतो नास्ति। अपि तु नृपत्वस्य सिद्धावस्थायामेव तं नृपमुद्दिश्य तादृशः प्रयोगः साधुत्वेन शिष्टैः परिगृहीतो वर्त्तते। द्वितीयञ्चोदाहरणं - [2]"राजा भव युध्यस्व" इत्यत्रापि असिद्धायां राजावस्थायां सम्बोधनविभक्त्यभावः पूर्वोक्तमेव सम्बोधनार्थं द्रढयति।

अनयोः उदाहरणयोः सूक्ष्मपर्यालोचनेनेदं निष्कृष्टं भवति। कुमारावस्थायां यदा राजरूपः अर्थः सिद्धः नास्ति तदा सिद्धस्य उद्देश्यभूतस्य अर्थस्य अभावे नागेशसम्मता अभिमुखीभावरूपसम्बोधनार्थसत्ता नोपपद्यते। उक्तोदाहरणे तादृशसत्तायाः अभावः शिष्टजनानुमोदितः इत्यपि सविशेषं ध्यातव्यम्। अत एव च तस्मिनुदाहरणे सम्बोधनविभक्तिस्थाने केवलं प्रथमा विभक्तिरेव शिष्टजनानुमोदिता वर्त्तते। एवमेव यत्र सम्बोध्यः राजपदार्थः सिद्धः वर्त्तते तत्र न केवलं शुद्धा प्रथमा प्रत्युत तत्र सम्बोधनाख्या एव प्रथमा अथवा सम्बोधनविभक्तिरेव भवति।

एवं पूर्वविवेचनस्य निष्कर्षः आयाति यत्र यत्र सम्बोध्यत्वेन अभिप्रेतस्य अर्थस्य सिद्धरूपेण भानं तत्रैव सम्बोधनविभक्तिः इत्यन्वयः; एवमेव यत्र यत्र च सम्बोध्यत्वेन विवक्षितस्य अर्थस्य सिद्धत्वं सिद्धावस्था वा नोच्यते तत्र तत्र सम्बोधनविभक्त्यभावः इति व्यतिरेकः। एवमन्वयव्यतिरेकाभ्याम् उद्देश्यावस्थस्य प्रातिपदिकार्थभूतस्य क्रियाविशेषसम्बद्धप्रवृत्तिनिवृत्त्यन्यतरफलकस्य सिद्धस्यैव द्रव्यस्य अभिमुखीभावः सम्बोधनार्थः इत्याञ्जस्येन सिद्ध्यति। एतादृशस्य सम्बोधनार्थस्य स्वीकारेणैव [3]"इन्द्रशत्रुर्वर्धस्व" इति स्थले इन्द्रशत्रुशब्दे सम्बोधनविभक्तेः प्रयोगः न भवति। प्रत्युत केवलं प्रथमैव भवति। अस्य वाक्यस्य प्रयोगकाले इन्द्रस्य शातयितृरूपः अर्थः सिद्धः नास्ति। अत एव तत्र वृत्रासुरं प्रति कथ्यते प्रथमं भवान् इन्द्रस्य शातयिता (विनाशकः) भवतु ततः वृद्धिव्यापारयुक्तः। एवञ्च वाक्यप्रयोगकाले वृत्रासुरस्य, इन्दस्य शातयितृत्वाभावेन सिद्धपदार्थत्वाभावेन सम्बोधनविभक्तिर्न प्रयुज्यते। अत्र " वर्धस्व" इति प्रतिपाद्यप्रवर्त्तनायाः उद्देश्यभूतः पुरुषः इन्द्रस्य शातयितृत्वेन फलतः इन्द्रशत्रुत्वेन युक्तः नास्ति। अत एव सिद्धः नास्ति। अत एव च अस्मिनुदाहरणे उक्तसम्बोधनार्थस्वीकृतिं नागेशाभिमतसम्बोधनार्थञ्चानुसृत्य सम्बोधनविभक्तेरभावः सकलविदुषामभीष्टो वर्त्तते।

---

[1] ल.श.शे. "सम्बोधने च"

[2] तत्रैव

[3] म.भा.पस्पशा

## प्राचीनमतविमर्शः -

एतत्प्रसङ्गे प्राचीनवैयाकरणैः प्रतिपादितस्य मतद्वयस्य उल्लेखो नागेशेन कृतो वर्त्तते। अथ च प्रदर्शितेऽस्मिन् मतद्वये आवश्यकदीर्घताशालित्वं परम्परानुगतसम्बोधनार्थराहित्यं च आपादितं वर्त्तते नागेशेन। [1]वैयाकरणसिद्धान्तलघुमञ्जूषायाः कलाख्यटीकायाः कर्त्ता प्रतिपादयति यदेतत् मतद्वयं दीक्षितादीनामिति। तत्स्वीकृत्य नागेशस्य युक्तिः इत्थं वर्त्तते। यथा - दीक्षितादीनां मतानुसारेण सम्बोधनार्थः न प्रकृतेः (प्रातिपदिकस्य) अर्थः अपितु स विभक्तिप्रत्ययानामेव अर्थः स्वीकार्यः। अयञ्च प्रत्ययार्थभूतः सम्बोधनार्थः अवश्यकर्त्तव्यत्वविषयकत्वज्ञानानुकूलज्ञापनमेव। एतज्ज्ञापनायैव सम्बोधनविभक्तेः प्रयोगः क्रियते इति उक्तैतन्मतद्वयस्य आशयो विद्यते। मतद्वयमिदं स्वमञ्जूषाग्रन्थे उपन्यस्य विवेचयति नागेशः।[2]

उक्तमते क्रियाविशेषे प्रयोक्तुः इच्छाविषयताकं यत् ज्ञानं तस्य ज्ञानस्य जननं (श्रोतृबुद्धौ स्थापनम्) सम्बोधनार्थः विद्यते। एतादृशं ज्ञानं तु सम्बोधनरहितपदघटितवाक्येऽपि अनुमित्या (श्रोतृकर्त्तृकया) श्रोतुश्चित्ते जायते एव। अतः एतादृशं ज्ञानं सम्बोधनविभक्तिलभ्यमेव इति कथनं युक्तिविरुद्धम्। तादृशज्ञानस्य सम्बोधनार्थकत्वस्वीकारो व्यर्थः गौरवं च यतः सकलस्यापि वाक्यमात्रबोधितस्य वाक्यार्थस्य वक्तृप्रयुक्तस्य ज्ञानं श्रोतुर्बुद्धौ संक्रमेत् एतदर्थमेव वक्ता वाक्यप्रयोगं करोति। एवञ्च सकलवाक्यार्थनिष्ठस्य अर्थस्य केवलसम्बोधनार्थता कथमुपपाद्या भवेत् केनापि वक्त्रा श्रोतारं प्रति प्रेषितवाक्यार्थे स्थितः वक्तुरभिप्रायः तस्य वक्तुः इच्छाया विषयः इति अस्माभिर्ज्ञायत एव। एतद्वैपरीत्ये यदि वाक्यार्थविशेषः श्रोतुर्बुद्धौ स्थाप्यत्वेन वक्तुरभीष्टो न भवेत् तर्हि वाक्यार्थविशेषबोधकस्य वाक्यस्य प्रयोगः वक्त्रा केन हेतुना क्रियते। इत्यस्य उत्तरं दुर्लभमेव भविष्यति। वाक्यस्य श्रवणोत्तरं प्रयोज्यस्य प्रवृत्तिः निवृत्तिः वा (क्रियाविशेषं प्रति) प्रयोक्तुः (वक्तुः) अभीष्टा भवति। अतः अन्यवाक्येभ्यः सम्बोधनपदस्य किं विशिष्टमतिरिक्तं महत्त्वम्? यतः सकलवाक्यबोध्ये प्रेषणीये अर्थे प्रयोक्तुः इच्छाघटितज्ञानवत्त्वं वर्त्तत एव। सम्बोधनपदघटितवाक्ये एव तज्ज्ञानमभीष्टं नान्यत्र इति व्यवस्थाया अभावात् अस्मिन् मते सम्बोधनपदस्य उक्तदीक्षितादिमतस्वीकारे वाक्यान्तरबोधवैलक्षण्यं प्रति हेतुत्वं नायाति।

अत एव अत्र मते अरुचिं प्रदर्श्य नागेशेन उपर्युक्तं स्वीयं मतं प्रकाशितम्। क्रियाविशेषं प्रति प्रयोज्यस्य प्रवृत्तिर्वा निवृत्तिर्वा नागेशोक्तसम्बोधनार्थसंबद्धप्रवर्तनाव्यापारेणैव सिद्ध्यति। तदर्थं सम्बोधनार्थे प्रयोक्तुः इच्छाविषयता इति रेखाङ्कितस्य अंशस्य निवेशो व्यर्थ एव। प्रयोक्तुः

---

[1] वै.सि.ल.म.कलाटीका

[2] वै.सि.ल.म.सुबर्थवादे

इच्छाविषयकज्ञानस्य अनुमानेनैव जायमानत्वं स्वीकृत्य नागेशः स्वमते लाघवं अनुभवानुकूलतां च दर्शयति।

निरुक्तेऽस्मिन् प्राचीनसम्मतसम्बोधनार्थे उक्तसम्बोधनार्थस्वरूपतात्पर्यस्य ग्राहकः "हे" इत्यादिशब्दानां प्रयोगः आवश्यको वर्त्तते। उक्तश्च सम्बोधनपदार्थः ज्ञापनस्वरूपः यदा अचेतने सम्बोध्येऽर्थे अन्वितो भवति तदा तत्र सम्बोधनार्थस्य उपपत्तये अचेतने सम्बोध्येऽर्थे चेतनस्य सम्बोध्यस्य अर्थस्य आरोपः क्रियते। एवं कमपि जडं चेतनं वा सम्बोध्यमभीमुखीकृत्य तस्य सम्बोध्यस्य कृते अज्ञातार्थज्ञानानुकूलो व्यापारः एव सम्बोधनपदस्य अक्षरार्थो ज्ञातव्यः। फलतः तादृशव्यापारजन्यज्ञानाश्रयत्वं सम्बोध्यत्वं तस्य सम्बोध्यस्य अन्वयः त्राणादिक्रियाविशेषेण सह जायते। सम्बोध्यनिष्ठं ज्ञानं यस्य विषयभूतं तस्मिन् ज्ञेये (प्रवर्त्तनारूपे) अर्थे एव सम्बोध्यस्य आकाङ्क्षा सुस्थिरा भवति। अत एव " राम त्रायताम्" अस्मिन् प्रयोगे रामरूपसम्बोधनार्थस्य प्रवर्त्तनाविषयत्राणरूपक्रियार्थस्य च परस्परमन्वये जाते सम्बोधनविषयराम - सम्बन्धिप्रवर्त्तना-विषयकं त्राणमिति शाब्दबोधो जायते।

पूर्वसूचनानुसारेण रामरूपप्रकृत्यर्थे प्रत्ययार्थस्य अन्वयो जातः। सम्बोधनस्य उक्तार्थकथनप्रसङ्गे "अभिमुखं कृत्वा" इत्ययमंशः निवेशितः आसीत्। यस्य तात्पर्यमित्थम् - वक्ता स्ववचनग्रहणाय सम्बोध्यं (श्रोतारम्) सादरं (स्वकथनश्रवणं प्रति) भावयित्वा तं ज्ञाप्यार्थस्य बोद्धारं भावयति करोति वा। मुखपरावृत्यादि एव तस्य व्यापारस्य व्यञ्जकं तत्त्वमिति विवेकः।

एवं प्राचीनमतं संस्थाप्य नागेशः कथयति - एतत्सर्वं प्राचीनाभिमतं सम्बोधनार्थकथनं हरिसदृशवैयाकरणमतापेक्षया फलविशेषं विना स्वरूपे विस्तृतं तथा च हर्युक्तसम्बोधनार्थ - गतमूलभूततथ्यैस्सह असम्पन्नञ्च। हर्युक्तसम्बोधनार्थक्रियार्थविनियोगपरःसिद्धवस्तुनः अभिमुखीभावः एतावन्मात्रमेव। अस्य शरीरं प्राचीनमतानुकूलसम्बोधनार्थशरीरात् लघु अत एव [१] एकमात्रालाघवेन पुत्रोत्सवं मन्यमानानां वैयाकरणानां कृते ग्राह्यतरं वर्त्तते। सम्बोधनविभक्तिः सु औ जस् तत्रैव भवति यत्र किमपि द्रव्यं सिद्धावस्थं सत् अवश्यमेव उद्देश्यावस्थं च भवेत्। अथ च उद्देश्यभूतस्य तस्य द्रव्यस्य विनियोगः प्रवर्त्तनाविषयक्रियायामवश्यं स्यात्। अत्रत्या सम्बोधनविभक्तिः सु औ जस् इत्यन्यतमरूपा सदैव द्योतिका एव वर्त्तते अन्यविभक्तिवत् इत्यपि नागेशेन अस्मिन् प्रकरणे स्पष्टीकृतं वर्त्तते।

उक्तश्च सम्बोधनार्थः प्रातिपदिकात् प्रातिपदिकार्थत्वेन जायते ।स च विभक्तिद्योत्यरित्यन्यदेतत्। फलतः " राम त्रायताम्" इत्यत्र अस्मिन् वाक्ये अभिमुखीभवन् रामः यत्र उद्देश्यभूतः एवंविधं प्रवर्त्तनाविषयभूतं रक्षणमिति शाब्दबोधः।

---

[१] प.भा.शे. १३३

नागेशोल्लिखितदीक्षितमतस्य तदुद्धृतहरिमतस्य च तुलनायां कृतायामयं निष्कर्षः आयाति यदुक्तं हरिमतमनुसृत्य स्वीकृतः अभिमुखीभावः सम्बोधनार्थः तादृशः अर्थः वर्त्तते यादृशस्य अर्थस्य फलितार्थः एव दीक्षितादिसम्मतः सम्बोधनार्थ इति।

एवं नागेशसमर्थिते हरिमतानुसारिसम्बोधनपदार्थे अभिमुखीभावरूपे सम्बोधनपदस्य शक्तिः इति स्वीकारे अथ च उक्तरीत्या प्रवर्त्तनाव्यापारस्य स्वीकारे सकलकार्यनिर्वाहः भवति। एवं सत्यपि तादृशदीक्षितादिसम्मतविस्तृतशक्यतावच्छेदकनिरूपितशक्तेः सम्बोधनपदे स्वीकारेण व्यर्थं गौरवम्। एवं पूर्वोक्तदिशा अनेन एतन्मतद्वयापेक्षया नागेशमते लाघवगुणेन सहैव अभिमुखीभावरूपे अर्थे ज्ञाते सद्यः एव आकाङ्क्षावशात् (किमर्थमभिमुखीभावः? इति जिज्ञासावशात्) श्रोतृबुद्धौ (सम्बोध्यपुरुषबुद्धौ) नागेशसमर्थितः निर्विरोधं भवत्येव। अत एव निष्पक्षो नागेशः सूचयति-इदं दीक्षितादिमतम् आचार्यहरिपरम्पराविरुद्धम् अनावश्यकगौरवदुष्टं च। अत एव सदोषत्वात् उपेक्ष्यम्। एवञ्च वैयाकरणपरम्परानुसारिमतस्य दीक्षितादिभिः अन्यथाकृतस्यापि उद्धारवशात् परम्पराप्राप्तस्य अर्थस्य अनुकूलव्याख्यानेन सुरक्षीकृतत्वाच्च अस्मिन् प्रसङ्गे नागेशः संस्कृतव्याकरणस्य श्रेष्ठो व्याख्याता इति सिद्ध्यति।

## सम्बोधनकारकस्य प्रथमाविभक्त्यन्तत्वं कर्तृवाचकत्वम् -

बृहद्वैयाकरणपरम्परा सम्बोधनेन सह कर्त्तृकारकस्य व्यवहारं करोति। अस्य तथ्यस्य आनुकूल्ये दीक्षितापेक्षया नागेशोक्तेः सम्बोधनार्थः सापेक्षदृष्ट्या अधिकः समीचीनः। यतः नागेशोक्ते अर्थे उद्देश्यतायाः क्रियाविनियोगपरकतायाश्च बोधः आञ्जस्येन भवति यः बोधः तादृशस्थलपरीक्षया नितरामावश्यकः प्रतीयते। अत एव सम्बोधनार्थस्य एवं कर्त्तृत्वस्वीकारादेव सम्बोधनार्थरूपस्य अभिमुखीभावसम्पन्नस्य प्रातिपदिकार्थस्य कर्तृवत् क्रियायामेव अन्वयो भवति। येन सम्बोधनपदे वार्त्तिककारमतोल्लिखितप्रथमायाः सिद्धिर्भवति। वार्त्तिककारश्च [1]"तिङ्समानाधिकरणे प्रथमा" इति वार्त्तिकं पठति। तदर्थश्च तिङः यत् अधिकरणं तस्मिन्नेव अधिकरणे स्थितः पदार्थः फलतः पदं प्रथमाविभक्तिं लभते। गच्छतीत्यादौ तिङ्प्रत्ययः अन्यैः अर्थैः सह कर्त्तृरूपे अर्थे विहितः एवमत्र तिङ्प्रत्ययः कर्त्तृरूपमेव अर्थं कथयति एवमत्र तिङ्समानाधिकरणता। नागेशव्याख्यया उक्तरीत्या अभिमुखीभावापन्नः प्रातिपदिकार्थः अपि कर्तृरूपतां विनियोज्यक्रियाकारकत्वात् अभिदधात्येव एवं तिङ्समानाधिकरणत्वात् तादृशं कर्त्र्यर्थघटितसम्बोधनपदं प्रथमां लभते।

[2]"प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" इति सूत्रे स्थितं मात्रपदं भाष्यकारेण

---

[1] महाभाष्ये

[2] अ. २-३-४६

प्रत्याख्यातं वर्त्तते। एवं मात्रग्रहणस्य प्रत्याख्याने स्वीकृते सति पञ्चकं प्रातिपदिकार्थः इति पक्षे अर्थपञ्चकमेव प्रातिपदिकार्थः तस्मादधिके कर्मादिरूपे प्रातिपदिकार्थे उपस्थिते सत्यपि प्रथमाया आपत्तिर्भवति तस्याः निरासाय [1]"सम्बोधने च" इति सूत्रस्य ज्ञापकत्वं स्वीक्रियते। तथा च ज्ञापकरूपस्य अस्य सूत्रस्य अर्थः वक्ष्यमाणस्वरूपकः भविष्यति। यथा - जात्यादिकर्तृकारकान्तात् प्रातिपदिकार्थात् अधिके अर्थे प्रथमा चेत्तर्हि सा प्रथमा केवलं सम्बोधनार्थरूपकारकार्थस्य आधिक्ये एव भवतु न तु कर्मत्वादिरूपे अधिके प्रातिपदिकार्थे सति सा भवति। एवं कर्मादिस्थलेषु प्रथमाया आपत्तिः दूरीभवति। मात्रपदप्रत्याख्यानस्थलीयः अयमाशयः अनया रीत्या कर्मादिकारकान् प्रथमाविभक्तेरनधिकारिणः उद्घोष्य सम्बोधनकारके प्रथमाविभक्तेः सिद्धिं फलतः कर्तृकारकतां च निःसङ्कोचं प्रकाशयति। कर्मादयोऽपि प्रातिपदिकस्यैव द्योत्यार्थाः अमादयः प्रत्ययाः द्योतकाः इति वादे एतत्सर्वं व्याख्यानं संगच्छते। प्रत्ययानां वाचकत्वे तु ततः स्वतन्त्रतया कर्मत्वादीनामुपस्थितिः इति तत्र ज्ञापकनिर्देशस्य उपर्युक्तस्य कर्मत्वादेः अर्थस्य प्रातिपदिकार्थत्वेन असिद्धस्य कर्मघटितवाक्यस्थलेऽपि प्रथमाविभक्तिरूपदोषस्य आपत्तिर्न सम्भवति । कर्मत्वादीनां स्पष्टतः प्रातिपदिकार्थत्वाभावात्।

व्रजानि देवदत्त इति पदसमूहे आचार्यो हरिः वाक्यत्वं तदाधारितां निघात (स्वर) सिद्धिं च मनुते। स्वकारिकायां स सदैव सम्बोधनं क्रियाविशेषणमेव स्वीकृतवान्। इममेवाशयं समधिकं विशदयन् टीकाकृत् पुण्यराजः कथयति -[2] सविशेषणमाख्यानं वाक्यमिति वाक्यलक्षणम्। एवञ्च सम्बोधनस्य क्रियाविशेषणत्वेन इदं वाक्यलक्षणमनुसृत्य "व्रजानि देवदत्त" इति पदसमूहो वाक्यम्। अत्र सम्बोधनपदं देवदत्त इति क्रियां प्रति विशेषणम्। एवं निर्विरोधतया अस्य पदसमूहस्य वाक्यत्वादेव तदाधारिता निघातसिद्धिः जायते।

सा च समाने वाक्ये.......... इत्यनुशासनेन जायते" वैयाकरणो भट्टोजिदीक्षितः तदनुयायिनश्च सम्बोधनार्थे क्रियाविशेषणत्वं साधयन्ति। परन्तु सा का क्रिया? यस्या विशेषणं सम्बोधनार्थः देवदत्त इति पदस्य अर्थः प्रयोजनं भवेत्। विशेष्यभूतायाः तस्याः क्रियायाः नामग्रहणे इमे वैयाकरणाः तूष्णीमासते नागेशस्तु एवं तेषां तूष्णीभावम् एतन्मतस्थन्यूनतामेव गृह्णाति। इत्थं च व्रजानि देवदत्त इति समूहस्य वाक्यत्वसिद्धये तदाधारितनिघातस्वरसिद्धये च दीक्षितादयः सम्बोधनार्थस्य क्रियाविशेषणरूपमुपायं दर्शयन्ति। अन्यथा अस्य पदसमूहस्य उपर्युक्तदिशा साधितवाक्यत्वं निघातसिद्धिश्च दुर्लभा इत्यस्ति चिन्ता प्राचीनवैयाकरणानां दीक्षितादीनां मनसि। सा च चिन्ता सम्बोधनार्थस्य क्रियाविशेषणत्वस्वीकारं विनापि अन्येन उपायेन तैः अपनेया सम्भवति। अथ च

---

[1] अ. २-३-४७

[2] प्रकाशटीका

सम्बोधनार्थस्य क्रियाविशेषणत्वरूपे उपाये स्वीकृतेऽपि विशेष्यभूतक्रियायाः अस्पष्टत्वात् क्रियाविशेषणत्वं तदाधारितवाक्यत्वं निघातत्वं च असिद्धप्रायमेव भविष्यति। दीक्षितादीनां मतस्य समालोचनप्रसङ्गे नागेशेन ईदृशी समीक्षा कृता। फलतः तन्मतं ग्राह्यं न सम्भवति। अत एव खण्डितप्रायमेव इति वस्तुस्थितिः। विशेष्यानुल्लेखात् सविशेषणत्वासिद्ध्या दीक्षितमतस्थितन्यूनतायाः स्वमते अभावः इति साधयति नागेशः। [1]शब्दरत्नकारो हरिदीक्षितः नागेशभट्टः नागेशटीकाकृत् [2]भैरवमिश्रश्च "जानीहि" इति पदमध्याहार्य तस्य विशेषणं सम्बोधनं (देवदत्तार्थः) पदार्थः इति मन्यन्ते। तेन क्रियाविशेषतायाः निर्दुष्टा सरला च व्यवस्था संगच्छते इति ते वदन्ति। अनया रीत्या सम्बोधनार्थस्य सविशेषणत्वसिद्धावपि अध्याहाररूपो दोषः तिङ्द्वयघटितत्वात् [3]एकतिङ्वाक्यम् इति मतेन सह विरोधश्च दृश्यते। एतत्स्थलीयमनोरमाकारवलम्बितमौनेन इदमपि कथयितुं शक्यते यत् मनोरमाकारः अत्र सम्बोधनार्थस्य अन्वयम् "व्रजानि" इति पदार्थेन सह अभिप्रैति। एवं स (दीक्षितमहोदयः) सम्बोधनार्थस्य क्रियाविशेषणतां संसाध्य वाक्यत्वं निघातसिद्धिं च सम्पादयति।

समानवाक्यत्वाधारितनिघातसिद्धिप्रपञ्चे आदरं प्रदर्श्य तत्सिद्धये सम्बोधनपदार्थस्य अन्यथा वा त्रुटिपूर्णं वा व्याख्यानं न शोभनमिति हेतोः श्रीदीक्षितं तदनुयायिनश्च आक्षिपन् नागेश एकतः उक्तदीक्षितचिन्ता (विशेष्यविशेषनामग्रहणस्य वा स्वाभिमतसम्बोधनार्थस्य क्रियाविशेषणत्वसिद्धये सम्बद्धक्रियार्थज्ञानचिन्ता) निवारकम् अपरतश्च हरिसम्मतसम्बोधनार्थप्रकाशकं व्याख्यानं प्रस्तौति। यथा "व्रजानि देवदत्त जानीहि" अस्य वाक्यस्य योऽर्थः तस्मिन्नेव अर्थे विवक्षिते सति "व्रजानि देवदत्त" इति पदसमूहस्य वृत्तिः नागेशस्य मतेन मुख्यः अर्थः वाक्यार्थः भवति तन्निरूपिता वृत्तिः (वाक्यशक्तिः) एव मुख्या शक्तिः। या च शक्तिः पदद्वयघटिते वाक्यत्वेन स्वीकृते (वाक्यैकदेशन्यायेन) समूहे विद्यते। श्रूयमाणावस्थायाम् "एकतिङ् वाक्यम्" इति वाक्यलक्षणमपि निघातसिद्धिः। देवदत्तोद्देश्यकः अभिमुखीभावः सम्बोधनार्थः अध्याहृतक्रियायां "जानीहि" इति स्वरूपतायां विनियोगं लभते। तत्रैव तस्य अन्वयोऽपि भवतीत्यर्थः। एवं च सम्बोधनार्थे क्रियाविशेषणतापि सारल्येन सिद्ध्यति यद्वशात् निघातसिद्धिश्च। अस्यां रीतौ प्राचीनपरम्परा(हरिपरम्परा)नुमोदितस्य व्याकरणशास्त्रीयस्य अर्थस्य रक्षा तथा च गौरवपूर्णसम्भावितत्रुटिपूर्णव्याख्यानस्य संशोधनं च सुस्पष्टं दृश्यते। स्मरणीयञ्च वर्त्तते यत् अस्मिन् प्रसङ्गे दीक्षितमतानुयायिभिः सम्बोधनार्थस्य अन्वययोग्यायाः क्रियायाः नामोल्लेखो न कृतः तथापि सम्बोधनार्थस्य क्रियाविशेषणत्वमुद्घोषितमिदं कार्यद्वयं न तथा रुचिकरं यथा उपर्युक्तं नागेशीयं विवेचनं स्पष्टं रुचिकरं चास्ति। अथ दीक्षितादिमतं सम्बोधनार्थदेवदत्तस्य विनियोगमन्वयश्च व्रजानि

[1] शब्दरत्ने सम्बोधने च

[2] भैरवी

[3] वार्त्तिककारमतम्

इति क्रियार्थेन मन्यते तर्हि देवदत्तस्य व्रजानि इति क्रियया सह विनियोगः अन्वयः च न समर्थनयोग्यः अनुभवविरोधात् अस्यां दशायां निघातसिद्धये वाक्यत्वसिद्धिः तदर्थसिद्धये सम्बोधनार्थस्य क्रियाविशेषणत्वमथवा वाक्यनिष्पादकत्वं च अपेक्षितं वर्त्तते। तत्साधनं दीक्षितादिमते क्लिष्टं नागेशव्याख्याने तु वाक्यैकदेशन्यायेन अध्याहृतक्रियायाः विशेषणत्वेन सम्बोधनपदार्थः क्रियाविशेषणं भवति। अत एव च सविशेषणमाख्यातं वाक्यमिति वाक्यलक्षणसमन्वयः। वाक्यैकदेशन्यायेन (नागेशसमर्थितेन) व्रजानि देवदत्त इत्यंशः " व्रजानि देवदत्त जानीहि" इति वाक्यस्य अनुवादकः तत्रैव उक्तवाक्यार्थनिरूपितशक्तेः सत्तायाः स्वीकारेण एकतिङ्वाक्यम् इत्यनुशासनेन वाक्यत्वसिद्धिः निघातसिद्धिश्च भवति।

सम्बोधनस्य अभिमुखीभावरूपः मुख्यः अर्थः वैयाकरणपरम्परानुमोदितः सुरक्षितश्च भवति। अस्मिन् मते दीक्षितपुण्यराजमतवत् अनुभवविरोधः सम्बोधनार्थस्य अन्वयकरणे क्लेशः तस्य विनियोगसाध्यक्लेशश्च सर्वथा परिहृतो भवति। शब्दरत्नकारस्य भैरवमिश्रस्य मतेनापि यद्यपि "जानीहि" इति क्रियायामेव सम्बोधनार्थस्य अन्वयेन सर्वं सूपपन्नं भवति तथापि बुद्धौ अध्याहृतक्रियायाः उपस्थापनं तत्र आवश्यकमिति तत्र गौरवदोषः नागेशमते तु यथोक्तं तदनुसारेण - व्रजानि देवदत्त इति पदद्वयघटिते समूहे एव "जानीहि" इत्यर्थः वक्यैकदेशन्यायेन सिद्धो भवतीति अध्याहृतक्रियायाः बुद्धौ उपस्थापनरूपगौरवं च नायाति इति नागेशविवेचनं प्रशस्यमित्यस्मद्विचारः।

## सन्दर्भग्रन्थसूचिः


१. लघुशब्देन्दुशेखरः- नागेशः- सं. श्रीगुरुप्रसादशास्त्री - चौखम्बा सुरभारती प्रकाशन, वाराणसी - २०१२

२. वैयाकरणसिद्धान्तलघुमञ्जूषा - नागेशः- सं.सभापतिशर्माउपाध्याय-शारदा संस्कृत संस्थान, वाराणसी - १९९६

३. व्याकरणमहाभाष्यम् - पतञ्जलिः - सं.गिरिधरशर्माचतुर्वेदी - चौखम्बा सुरभारती प्रकाशन, वाराणसी - २००५

४. प्रौढमनोरमा - भट्टोजिदीक्षितः - सं. गोपालशास्त्री नेने - चौखम्बा संस्कृत संस्थान, वाराणसी - १९९९

५. वै.सिद्धान्तकौमुदी - भट्टोजिदीक्षितः - सं.श्रीगोपालदत्तपाण्डेयः- चौखम्बासुरभारतीप्रकाशन, वाराणसी - २०११